Ityantabhattopadhyay
Tarka sangraha dipika
तर्कसंग्रह दीपिका
Sanskrit
Paper - Printed
1801 Sakabda (139 years old)
24 Folio
9.8" x 4.2"
Complete

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

F-23

१०%० नं ५०

N. 118

अथ तर्कसंग्रह दीपिका प्रारंभः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

श्रीगणेशायनमः ॥ विश्वेश्वरंसांबमूर्तिं प्रणिपत्यगिरंगुरुं टीकांशिशुहितांकुर्वे तर्कसंग्रहदी
पिकां १ चिकीर्षितस्यग्रंथस्याविघ्नपरिसमाप्त्यर्थंशिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकंइ
ष्टदेवतानमस्कारलक्षणंमंगलंशिष्यशिक्षार्थंनिबध्नन् चिकीर्षितंप्रतिजानीते ॥निधायेति ननु
मंगलस्यसमाप्तिसाधनत्वंनास्ति ॥ मंगलेकृतेपिकिरणावल्यादावसमाप्तिदर्शनात् ॥ मंगला-
भावेपिकादंबर्यादौसमाप्तिदर्शनात् अन्वयव्यतिरेकव्यभिचारादितिचेन्न ॥किरणावल्यादौवि
घ्नबाहुल्यात्समाप्त्यभावः ॥कादंबर्यादौतुग्रंथाद्बहिरेवमंगलंकृतम् ॥अतोनव्यभिचारः॥ननुमं-
गलस्यकर्तव्यत्वेकिंप्रमाणमितिचेन्न॥ शिष्टाचारानुमितश्रुतेरेवप्रमाणत्वात् ॥समाप्तिकामोमंग
लमाचरेदितिश्रुतेः ॥ तथाहि॥मंगलंवेदबोधितकर्तव्यताकं ॥अलौकिकाविगीतशिष्टाचारवि
षयत्वात् ॥दर्शादिवत् ॥ भोजनादौव्यभिचारवारणायालौकिकेति रात्रिश्राद्धादौव्यभिचारवारणाय

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

अविगीतेति शिष्टपदंस्पष्टार्थं नकुर्यान्निष्फलंकर्मेतिजलताडनादेरपिनिषिद्धत्वादिति तर्क्यं
ते प्रतिपाद्यंतेइतितर्काः द्रव्यादिपदार्थाः तेषांसंग्रहः संक्षेपेणस्वरूपकथनंक्रियतइत्यर्थः कस्मै
प्रयोजनायेत्यतआह सुखबोधायेति सुखेनअनायासेनबोधः पदार्थज्ञानंतस्मै इत्यर्थः ननुबहुषु
तर्कग्रंथेषुसत्सुकिमर्थमपूर्वग्रंथः क्रियतइत्यतआह बालानामितितेषांअतिविस्तृतत्वात् बालानांबो
धोनभवतीत्यर्थः ग्रहणधारणपटुर्बालः ननुस्तनंधयः किंकृत्वाक्रियतइत्यतआह निधायेति वि-
श्वेशं जगन्नियतारंसांबंहृदिनिधायनितरांस्थापयित्वासर्वदातध्यानपरोभूत्वेत्यर्थः गुरूणांवि
द्यागुरूणांवंदनंनमस्कारंकृत्वेत्यर्थः ॥ पदार्थान्विभजते ॥ द्रव्येति ॥ पदस्यार्थः पदार्थः इति-
व्युत्पत्त्या अभिधेयत्वंपदार्थसामान्यलक्षणंलभ्यते ननुविभागादेवसप्तत्वेलब्धेसप्तग्रहणंव्य
र्थमितिचेन्न न्यूनाधिकसंख्याव्यवच्छेदार्थत्वात् ॥ नन्वतिरिक्तपदार्थः प्रमितोवानवानाद्यः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रमितस्यनिषेधायोगात् नांत्यः प्रतियोगिप्रमितिं विनानिषेधानुपपत्तेरितिचेन्न पदार्थत्वंद्र
व्यादिसप्तान्यतमत्वव्याप्यमितिव्यवच्छेदार्थत्वात् ननुसप्तान्यतमत्वंसप्तभिन्नभिन्नत्वमितिवक्तव्यं
एवंचसप्तभिन्नस्याप्रसिद्धत्वात्सप्तान्यतमत्वंकथमितिचेन्न द्रव्यादिसप्तान्यतमत्वं द्रव्यादिभेद
सप्तकाभाववत्त्वमित्युक्तत्वात् एवमग्रेपिद्रष्टव्यं द्रव्यंविभजते तत्रेति तत्रद्रव्यादिमध्येद्रव्या॰
णिनवेत्यन्वयः कानितानीत्यतआह पृथिवीत्यादि ननुतमसोदशमद्रव्यस्यविद्यमानत्वात् क
थंनवद्रव्याणि तथाहिनीलंतमश्चलतीत्यबाधितप्रतीतिबलात् ॥ नीलरूपाधारतयाक्रिया
धारतयाचद्रव्यत्वंतावत्सिद्धं तच्चतमसोनाकाशादिपंचकेंतर्भावः रूपवत्त्वात् अतएवन॰
वायोसदागतिमत्त्वाभावाच्च नापितेजसि भास्वररूपाभावात् उष्णस्पर्शाभावाच्च नापि॰ २
जले शीतस्पर्शाभावात् नीलरूपाश्रयत्वाच्च नापिपृथिव्यांगंधाभावात्स्पर्शरहितत्वाच्च त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्मात्तमोदशमद्रव्यमितिचेन्न तमसस्तेजोऽभावरूपवत्त्वात् तथाहि तमोनरूपवद्रव्यं आलोकासहकृतचक्षुर्ग्राह्यत्वात् आलोकाभाववत्तद्रूपिचाक्षुषप्रमायामालोकस्यकारणत्वात् तस्मादुद्भूतप्रकाशकतेजः सामान्याभावस्तमः तन्नीलतमश्चलतीतिप्रत्ययोभ्रमः अतोनवद्रव्याणीतिसिद्धं द्रव्यत्वजातिमत्त्वंगुणवत्त्वंवाद्रव्यसामान्यलक्षणम् लक्ष्यैकदेशावृत्तित्वं अव्याप्तिः यथागोः कपिलत्वम् अलक्ष्यवृत्तित्वंअतिव्याप्तिः यथागोःशृंगित्वं लक्ष्यमात्रावर्तनंअसंभवः यथागोरेकशफत्वं एतद्दूषणत्रयरहितोधर्मोलक्षणं सएवासाधारणधर्मइत्युच्यते यथागोःसास्नादिमत्त्वेसतिशृंगित्वं लक्ष्यतावच्छेदकसमनियतत्वमसाधारणत्वम् व्यावर्तकस्यैवलक्षणत्वेव्यावृत्तावभिधेयत्वादौच अतिव्याप्तिवारणायतद्भिन्नत्वंधर्मविशेषणंदेयं व्यवहारस्यापिलक्षणेप्रयोजनत्वेतुनदेयं व्यावृत्तेरपिव्यवहारसाधनत्वात् ननुगुणवत्त्वंनद्रव्यलक्षणं आ-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त. सं. द्यक्षणेउत्पन्नविनष्टे द्रव्येचाव्याप्तेरितिचेन्न गुणसमानाधिकरणसत्ताभिन्नजातिमत्त्वस्यवि दी.
३ वक्षितत्वात् ननुएवमपिएकंरूपंरसात्पृथगितिव्यवहारात् रूपादौअतिव्याप्तिरितिचेन्न
एकार्थसमवायादेवताहृशव्यवहारोपपत्तौगुणेगुणानंगीकारात् गुणान्विभजते रूपेति
द्रव्यकर्मभिन्नत्वेसतिसामान्यवान्गुणः गुणत्वजातिमान्वा ननुलघुत्वमृदुत्वकाठिणत्वादी-
नांविद्यमानत्वात् कथंचतुर्विंशतिगुणाइतिचेन्न लघुत्वस्यगुरुत्वाभावरूपत्वात् मृदुत्वक
ठिणत्वयोः अवयवसंयोगविशेषरूपत्वात् कर्मविभजतेउत्क्षेपणेति संयोगत्वाभिन्नत्वेसतिसं
योगासमवायिकारणंकर्म कर्मत्वजातिमद्वा भ्रमणादीनामपिगमनेऽन्तर्भावात् नपंचत्व
विरोधः सामान्यंविभजते परमिति परमाधिकवृत्तिअपरंन्यूनवृत्तिसामान्यादिचतुष्टयेजाति ३
न विशेषंविभजते नित्यद्रव्येति पृथिव्यादिचतुष्टयस्यपरमाणवः आकाशादिपंचकंच नित्यद्र-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्याणि समवायस्यभेदोनास्तीत्याह समवायस्त्विति॥अभावंविभजते प्रागभावइति त-
त्रउद्देशक्रमानुसारात् प्रथमंपृथिव्यालक्षणमाह गंधवतीति नाम्नापदार्थसंकीर्त्तनमु
द्देशः उद्देशक्रमेचसर्वत्रेच्छैवनियामिका ननुसुरभ्यसुरभ्यवयवारब्धेद्रव्येपरस्परविरोधेनगं
धानुत्पादादव्याप्तिः नचतत्रगंधप्रतीत्यनुपपत्तिरितिवाच्यं अवयवगंधस्यैव तत्रप्रतीतिसंभवे
नचित्रगंधानंगीकारात् किंचोत्पन्नविनष्टघटादावव्याप्तिरितिचेन्नगंधसमानाधिकरणद्रव्य
त्वापरजातिमत्त्वस्यविवक्षितत्वात् ननुजलादावपिगंधप्रतीतेरतिव्याप्तिरितिचेन्न अन्व
यव्यतिरेकाभ्यांपृथिवीगंधस्यैवतत्रभानांगीकारात् ननुतथापिकालस्यसर्वाधारतया स
र्वेषांलक्षणानांकाले अतिव्याप्तिरितिचेन्न सर्वाधारताप्रयोजकसंबंधभिन्नसंबंधेनल-
क्षणत्वस्य अभिमतत्वात् पृथिवींविभजते साद्विविधेति नित्यत्वंध्वंसाप्रतियोगित्वं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ध्वंसप्रतियोगित्वं अनित्यत्वं प्रकारांतरेण विभजते आत्मनो भोगायतनं शरीरं यदवच्छि
न्नात्मनि भोगो जायते तद्भोगायतनं सुखदुःखान्यतरसाक्षात्कारो भोगः शब्देतरोद्भूतवि
शेषगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वमिंद्रियत्वम् शरीरेंद्रियभिन्नो वि
षयः एवंच गंधवच्छरीरं पार्थिवशरीरं गंधवदिंद्रियं पार्थिवेंद्रियम् गंधवान् विषयः पा
र्थिवविषय इति तत्तल्लक्षणं बोध्यम् पार्थिवशरीरं दर्शयति शरीरमिति इंद्रियं दर्शयति इं
द्रियमिति गंधग्राहकमिति प्रयोजनकथनं घ्राणमिति संज्ञा नासाग्रेत्याश्रयोक्तिः एवमुत्तर
त्रापि ज्ञेयम् पार्थिवविषयं दर्शयति मृत्पाषाणेति अपां लक्षणमाह शीतेति उत्पन्नविनष्ट
जले अव्याप्तिवारणाय शीतस्पर्शसमानाधिकरणद्रव्यत्वापरजातिमत्त्वे तात्पर्यं शीतं शिलात

लमित्यादौ जलसंबंधादेव शीतस्पर्शभानमिति नातिव्याप्तिः अन्यत्सर्वं पूर्ववत् व्याख्येयं

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तेजसोलक्षणमाह उष्णस्पर्शवदिति उष्णंजलमितिप्रतीतेस्तेजःसंबंधानुविधायित्वा
न्नातिव्याप्तिः विषयंविभजते भौमेति ननुसुवर्णंपार्थिवम् पीतत्वात् गुरुत्वात् हरिद्रादि
वत् इतिचेन्न अत्यंतानलसंयोगेसति घृतादौ द्रवत्वनाशदर्शनेनजलमध्यस्थघृते नाशाद
र्शनेन असतिप्रतिबंधेपार्थिवद्रवत्वनाशाग्निसंयोगयोः कार्यकारणभावावधारणात् सुव-
र्णस्य अत्यंतानलसंयोगेसति अनुच्छिद्यमानद्रवत्वाधिकरणत्वेन पार्थिवत्वानुपपत्तेः त
स्मात्पीतद्रव्यद्रवत्वनाशप्रतिबंधकतयाद्रवद्रव्यांतरसिद्धौ नैमित्तिकद्रवत्वाधिकरणतया-
जलत्वानुपपत्तेः रूपवत्तयावाय्वादिषु अनंतर्भावात्तैजसत्वसिद्धिः तस्यउष्णस्पर्शभास्वररू
पयोः उपष्टंभकपार्थिवरूपस्पर्शाभ्यांप्रतिबंधादनुपलब्धिः तस्मात्सुवर्णंतैजसमिति
सिद्धं॥ वायुंलक्षयति रूपरहितेति आकाशादावतिव्यातिवारणायस्पर्शवानिति पृथिव्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त·स· दावति व्याप्तिवारणायरूपरहितेति ननुप्राणस्यकुत्रांत र्भावइत्यतआह शरीरेइति सचे· दी·
ति एकएवप्राणस्थानभेदात् प्राणापानादिशब्दैर्व्यवह्रीयत इत्यर्थः स्पर्शानुमेयोवायुः त
थाहि योयंवायोवातिसति अनुष्णाशीतस्पर्शोभासते सःस्पर्शः क्वचिदाश्रितः गुणत्वात्
रूपवत् नचास्य पृथिव्याश्रयः उद्भूतस्पर्शवत् पार्थिवस्यउद्भूतरूपवत्त्वनियमात् नजल
तेजसी अनुष्णाशीतत्वात् नभुविचतुष्टयम् सर्वत्रोपलब्धिप्रसंगात् नमनः परमाणु
स्पर्शस्य अतींद्रियत्वात् तस्माद्यःप्रतीयमानस्पर्शाश्रयः सवायुः ननुवायुः प्रत्यक्षः प्र-
त्यक्षस्पर्शाश्रयत्वात् घटवदितिचेन्न उद्भूतरूपवत्त्वस्यउपाधित्वात् यत्रद्रव्यत्वेसतिबहि
रिंद्रियप्रत्यक्षत्वंतत्ररूपवत्त्वमितिसाध्यव्यापकत्वं पक्षेसाधनाव्यापकत्वम् नचैवंतप्तवा- ५
रिस्थतेजसोप्यप्रत्यक्षत्वापत्तिः इष्टत्वात् तस्माद्रूपरहितत्वाद्वायुरप्रत्यक्षः इदानींका-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्यरूप पृथिव्यादिचतुष्टयस्य उत्पत्तिविनाशक्रमः कथ्यते ईश्वरस्यचिकीर्षावशात् परमाणुषुक्रियाजायतेततः परमाणुद्वयसंयोगेनद्व्यणुकमुत्पद्यतेत्रिभिर्द्व्यणुकैः त्र्यणुकएवंचतुरणुकादिक्रमेणमहापृथिवीमहत्यआपः महत्तेजः महान्वायुरुत्पद्यते एवंउत्पन्नस्य कार्यद्रव्यस्य संजिहीर्षावशात् क्रियया परमाणुद्वयविभागेमतिद्व्यणुकनाशः ततस्त्र्यणुकस्य ततश्चतुरणुकस्य इत्येवपृथिव्यादिनाशः असमवायिकारणनाशाद्व्यणुकनाशः समवायिकारणनाशात्त्र्यणुकनाशइतिसंप्रदायः सर्वत्रअसमवायिकारणनाशात् द्रव्यनाशइतिनवीनाः किंपुनः परमाणुसद्भावेप्रमाणं उच्यते जालसूर्यमरीचिस्थंसूक्ष्मतमंयद्रजउपलभ्यते तत्सावयवम् चाक्षुषद्रव्यत्वात् पटवत् त्र्यणुकावयवोपिसावयवः महदारंभकत्वात् तंतुवत् योद्व्यणुकावयवः सएवपरमाणुः सचनित्यः कार्यत्वेअनव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्याप्रसंगात् सृष्टिप्रलयसद्भावेकिंमानं धातायथापूर्वमकल्पयदित्यादिश्रुतिः प्रमा-
णं सर्वकार्यद्रव्यध्वंसः अवांतरप्रलयः सर्वभावकार्यध्वंसो महाप्रलयइतिविवेकात् आ-
काशंलक्षयति शब्दगुणकमिति ननुआकाशमपिकिंपृथिव्यादिवत् नानानेत्याह तच्चैक
मितिभेदेप्रमाणाभावादित्यर्थः एकत्वादेवसर्वत्रशब्दोपलब्धेर्विभुत्वमंगीकर्तव्यमित्याह
विभ्विति सर्वमूर्तद्रव्यसंयोगित्वंविभुत्वं मूर्तत्वंपरिछिन्नपरिमाणवत्त्वंक्रियावत्त्वंवा विभु
त्वादेवआत्मवत्नित्यत्वमित्याह।नित्यंचेति कालंलक्षयति अतीतेतिसर्वाधारःकालः सर्व-
कार्यनिमित्तकारणंच दिशोलक्षणमाह प्राचीति दिगपिकार्यमात्रेनिमित्तकारणम् आ
त्मनोलक्षणमाह ज्ञानेति आत्मानंविभजते सद्विविधइति परमात्मनोलक्षणमाह तत्रे-
ति नित्यज्ञानाधिकरणत्वंईश्वरत्वम् ननुईश्वरसद्भावेकिंप्रमाण ननावत्प्रत्यक्षं तद्धि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्वं आभ्यंतरं वा नाद्यः अरूपिद्रव्यत्वात् नांत्यः आत्मसुखाद्यतिरिक्तत्वात् नाप्यनुमानं
लिंगाभावादितिचेन्न अंकुरादिकं कर्तृजन्यं कार्यत्वात् घटवदित्यनुमानस्य प्रमाणत्वात्
उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वं कर्तृत्वं उपादानं समवायिकारणम् सकलपरमा-
ण्वादिसूक्ष्मदर्शित्वात्सर्वज्ञत्वम् यः सर्वज्ञः स सर्ववित् इत्यागमोपि तत्र प्रमाणम् जीवस्य लक्षण
माह जीव इति सुखादिकं जीवलक्षणम् ननु मनुष्योहं ब्राह्मणोहं इत्यादौ सर्वत्र अहंप्रत्यये
शरीरस्यैव विषयत्वात् शरीरमेव आत्मेति चेन्न शरीरस्य करपादादिनाशे शरीरनाशात् आत्म-
नोपि नाशप्रसंगात् नापि इंद्रियाणामात्मत्वं योहं घटमद्राक्षं सोहं इदानीं त्वचा स्पृशामीत्य
नुसंधानाभावप्रसंगात् अन्यानुभूते अन्यस्यानुसंधानायोगात् तस्मात् देहेंद्रियव्यतिरिक्तो जी-
वः सुखदुःखादिवैचित्र्यात् प्रतिशरीरं भिन्नः स च न परमाणुः शरीरव्यापिसुखाद्यनुपल-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

धिप्रसंगात् नमध्यमपरिमाणवान् तथासत्यनित्यत्वप्रसंगेन कृतनाशाकृताभ्यागमप्रसं
गात् तस्मान्नित्योविभुर्जीवः मनसोलक्षणमाह सुखेति स्पर्शरहितत्वेसतिक्रियाव-
त्वमनसोलक्षणम् मनोविभजते तच्चेति एकैकस्यात्मनएकैकंमनइत्यात्मनामनेकत्वात्
मनसोप्यनेकत्वमित्यर्थ परमाणुरूपमिति मध्यमपरिमाणत्वे नित्यत्वप्रसंगादित्यर्थः ननु
मनोविभुः स्पर्शरहितद्रव्यत्वात् आकाशादिवत्इतिचेन्न मनसोविभुत्वेसत्यात्ममनः सं
योगस्यअसमवायिकारणस्य अभावात्ज्ञानानुत्पत्तिप्रसंगात् नचविभुद्वयस्यसंयोगो-
स्त्विति वाच्यं विभुद्वयसंयोगस्यनित्यत्वेनसुषुप्त्यभावप्रसंगात् पुरीततिव्यतिरिक्तप्रदेशा-
त्ममनः संयोगस्यसर्वदाविद्यमानत्वात् अणुत्वेतुयदामनः पुरीततिंप्रविशातितदासुषुप्ति
यदानिःसरतितदाज्ञानोत्पत्तिरित्यणुत्वसिद्धिः रूपंलक्षयति चक्षुरिति संख्यादाव

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

तिव्याप्तिवारणायपदं रूपत्वेअतिव्याप्तिवारणायगुणपदम् ननुअव्याप्यवृत्तिर्नीलादि समुदाय एवचित्ररूपमितिचेन्नरूपस्यव्याप्यवृत्तित्वनियमात् ननुचित्रपटेअवयवरूपस्यप्र तीतिरितिचेन्न व्याप्यवृत्तिजातीयगुणानामव्याप्यवृत्तित्वविरोधात् नचप्रत्यासवयवी निरूपएवेतिवाच्यं रूपस्यव्याप्यवृत्तित्वनियमात् रूपरहितत्वेन पटस्यअप्रत्यक्षत्वप्रसं गात् नचरूपवत्समवेतत्वं प्रत्यक्षत्वप्रयोजकम् गौरवात् तस्मात्पटस्यप्रत्यक्षत्वानुपप- त्याचित्ररूपसिद्धिः रसंलक्षयति रसनेतिरसत्वेअतिव्याप्तिवारणायगुणपदम् रसस्याश्रय माह पृथिवीति आश्रयंविभज्यदर्शयति पृथिव्यामिति गंधंलक्षयति घ्राणेति गंधत्वेअति व्याप्तिवारणायगुणपदंस्पर्शंलक्षयति त्वगिति स्पर्शत्वेअतिव्याप्तिवारणायगुणपदम् सं- योगादावतिव्याप्तिवारणायमात्रपदम् पाकजमिति पाकस्तेजःसंयोगः तेनपूर्वरूपंनश्यति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रूपांतरमुत्पद्यते इत्यर्थः अत्रपरमाणुष्वेवपाकः नद्व्यणुकादौ आमनिक्षिप्तघटेपरमाणुषु रूपांतरोत्पत्तौपाकेनश्यामघटनाशेनपुनर्द्व्यणुकादिक्रमेणरक्तघटोत्पत्तिः तत्रपरमाणवः समवायिकारणंतेजः संयोगोसमवायिकारणं अदृष्टादिकंनिमित्तकारणं द्व्यणुकादिरूपेकारणरूपसमवायिकारणमिति पिलुपाकवादिनोवैशेषिकाः पूर्वघटस्यनाशंविनैवावयविन्यवयवेषुपरमाणुपर्यंतेषुयुगपत् रूपांतरोत्पत्तिरितिपिठरपाकवादिनोनैयायिकाः अतएवपार्थिवपरमाणुरूपादिकमनित्यमित्यर्थः अन्यजलादावित्यर्थः नित्येतिपरमाणुगतमित्यर्थः अनित्यगतमिति द्व्यणुकादिनिष्ठमित्यर्थः रूपादिचतुष्टयमुद्भूतंप्रत्यक्षं अनुद्भूतमप्रत्यक्षम् उद्भूतत्वंप्रत्यक्षत्वप्रयोजकोधर्मः तदभावः अनुद्भूतत्वम् संख्यांलक्षयतिएकेति परिमाणंलक्षयतिमानेति परिमाणंविभजते तच्चेति भावप्रधानोनिर्देशः अणुत्वंमहत्त्वंदीर्घत्वंह्रस्वत्वंचेत्यर्थः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

पृथक्त्वलक्षयति पृथगिति इदमस्मात्पृथगिति व्यवहारकारणमित्यर्थः संयोगं लक्षयति संयुक्तेति इमौसंयुक्ताविति व्यवहार हेतुरित्यर्थः संख्यादिलक्षणेषु सर्वत्र दिक्कालादावति- व्याप्तिवारणाय असाधारणेति संयोगो द्विविधः कर्मजः संयोगजश्च आद्यो हस्तक्रियायापुस्तकसंयोगः द्वितीयो हस्तपुस्तकसंयोगात्कायपुस्तकसंयोगः अव्याप्यवृत्तिः संयोगः स्वात्यंताभावसमानाधिकरणत्वमव्याप्यवृत्तित्वं विभागं लक्षयति संयोगेति कालादावति- व्याप्तिवारणायगुणाइति रूपादावतिव्याप्ति वारणायसंयोगनाशकइति विभागोपिद्विविधः कर्मजोविभागश्च आद्यो हस्तपुस्तकविभागः द्वितीयः कायपुस्तकविभागः परत्वापरत्वयोर्लक्षणमाह परापरेति परव्यवहारकारणं परत्वं अपरव्यवहारकारणमपरत्वमित्यर्थः विभजतेतेद्विधेइति दिक्कृतयोरुदाहरणमाह दूरस्थइति कालकृतेउदाहरति ज्येष्ठइति

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

गुरुत्वं लक्षयति आद्येति द्वितीयादिपतनस्य वेगासमवायिकारणकत्वात् वेगे अतिव्या
प्तिवारणाय आद्येति द्रवत्वं लक्षयति भावस्यंदनेति स्यंदनं श्रवणं तेजःसंयोगजन्यं नैमित्ति
कं तद्भिन्नं सांसिद्धिकम् पृथिव्यां नैमित्तिकमुदाहरति घृतादाविति तेजसि तदाह स्व
र्णादाविति स्नेहं लक्षयति चूर्णेति कालादावति व्याप्तिवारणाय गुणइति रूपादावति·
व्याप्तिवारणाय पिंडीभावहेतुरिति शब्दं लक्षयति श्रोत्रेति शब्दत्वे अतिव्याप्तिवारणाय
गुणइति रूपादावति व्याप्तिवारणाय श्रोत्रेति शब्दस्त्रिविधः संयोगजो विभागजः शब्दजश्चे
ति तत्राद्यो भेरीदंडसंयोगजन्यः द्वितीयो वंशे छेद्यमाने दलद्वयविभागजन्यश्चटचटशब्दः
भेर्यादिदेशमारभ्य श्रोत्रपर्यंतं द्वितीयादिशब्दाः शब्दजाः बुद्धेर्लक्षणमाह बुद्धिरिति जा ९
नामीत्यनुव्यवसायगम्यज्ञानत्वमेव लक्षणमित्यर्थः बुद्धिं विभजते सेति स्मृतेर्लक्षणमाह

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

संस्कारेति भावनाख्यसंस्कारः संस्कारध्वंसेअतिव्याप्तिवारणायज्ञानमिति घटादिप्रत्यक्षे
अतिव्याप्तिवारणायसंस्कारजन्यमिति अनुभवंलक्षयति तद्भिन्नमिति स्मृतिभिन्नंज्ञान
मनुभवइत्यर्थः अनुभवंविभजतेसाद्विविधइति यथार्थानुभवस्यलक्षणमाह तद्वतीति ननु
घटेघटत्वमितिप्रमाणमव्याप्तिः घटत्वेघटाभावादितिचेन्न यत्रयस्ययःसंबंधोस्तितत्रतस्य-
संबंधानुभवइत्यर्थात् घटत्वेपिघटसंबंधोस्तीतिनाव्याप्तिः सैवेति यथार्थानुभवएवशास्त्रे
प्रमेत्युच्यतइत्यर्थः अयथार्थंलक्षयतितदभाववतीति ननु इदंसंयोगीतिप्रमायामतिव्या
प्तिरितिचेन्न यदवच्छेदेनयत्संबंधाभावस्तदवच्छेदेनतत्संबंधज्ञानस्याविवक्षितत्वात् सं
योगावच्छेदकावच्छेदेनसंयोगसंबंधस्यचसत्वान्नातिव्याप्तिः संयोगावच्छेदेनसंयोगसंबंध
स्यसत्वान्नातिव्याप्तिः यथार्थानुभवंविभजते यथार्थेति प्रसंगात् प्रमाकरणंविभजते त

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रकरणमिति प्रमाकरणमित्यर्थः प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्षणं करणल·
क्षणमाह असाधारणेति साधारणकारणे दिक्कालादावतिव्याप्तिवारणाय असाधारणेति कार
णलक्षणमाह कार्येति पूर्ववृत्तिकारणमित्युक्ते रासभादावतिव्याप्तिः स्यादतो नियतेति ताव·
न्मात्रे कृते कार्ये अतिव्याप्तिः अतः पूर्ववृत्तीति ननु तन्तुरूपमपि पटं प्रति कारणं स्यादिति चेन्न अनन्य·
थासिद्धत्वे सतीति विशेषणात् अनन्यथासिद्धत्वं अन्यथासिद्धिविरहः अन्यथासिद्धिश्च त्रिविधा
येन सहैव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तत् तेन तं प्रति अन्यथासिद्धं यथा तन्तुना तन्तुरूपं तन्तुत्वं
च पटं प्रति अन्यं प्रति पूर्ववृत्तित्वे ज्ञाते एव यस्य यं प्रति पूर्ववृत्तित्वमवगम्यते तं प्रति तदन्यथासिद्धं
यथा शब्दं प्रति पूर्वरूपत्वे ज्ञात एव पटं प्रति आकाशस्य अन्यत्र क्लृप्तनियतपूर्ववर्तिन एव कार्यसंभ
वे तत्सहभूतं अन्यथासिद्धं यथा पाकजस्थले गंधं प्रति रूपप्रागभावस्य एवं च अन्यथासिद्धानि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यत्पूर्ववृत्तित्वं कारणत्वं कार्यलक्षणमाह कार्यमिति कारणं विभजते कारणमिति समवायि कारणलक्षणमाह यत्समवेतमिति यस्मिन्समवेतमित्यर्थः असमवायिकारणं लक्षयति कार्येणेति कार्येणेत्येतदुदाहरति तंतुसंयोगइति कार्येणपटेन एकस्मिन्तंतौ समवेतत्वात्तंतुसंयोगः पटस्य असमवायिकारणमित्यर्थः कारणेनेत्येतदुदाहरति तंतुरूपमिति कारणेनपटेन सह एकस्मिन्तंतौ समवेतत्वात् तंतुरूपं पटरूपस्य असमवायिकारणमित्यर्थः निमित्तकारणं लक्षयति तदुभयेति समवाय्यसमवायिभिन्नकारणं निमित्तकारणमित्यर्थः करणलक्षणमुपसंहरति तदेतदिति प्रत्यक्षलक्षणमाह तत्रेति प्रमाणचतुष्टयमध्य इत्यर्थः प्रत्यक्षज्ञानस्य लक्षणमाह इंद्रियेति इंद्रियं चक्षुरादिकम् अर्थो घटादिः तयोः सन्निकर्षः संयोगादिः तज्जन्यं ज्ञानमित्यर्थः सविकल्पकस्य लक्षणमाह सप्रकारकमिति नाम जात्यादिविशेषणविशेष्यावगाहिज्ञानमित्यर्थः निर्विक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ल्पकस्य लक्षणमाह निष्प्रकारमिति विशेषणविशेष्यसंबंधानवगाहिज्ञानमित्यर्थः ननु निर्वि
कल्पके किं प्रमाणमिति चेन्न गौरिति विशेषज्ञानं विशेषणज्ञानजन्यं विशिष्टज्ञानत्वात् दंडीति ज्ञा
नवदित्यनुमानस्य प्रमाणत्वात् विशेषणज्ञानस्यापि सविकल्पकत्वे ऽनवस्थाप्रसंगात् निर्विकल्प
कसिद्धिः सविकल्पकं लक्षयति सप्रकारकमिति नामजात्यादिविशेषणविशेष्यसंबंधावगाहिज्ञान
मित्यर्थः सविकल्पकमुदाहरति यथेति इंद्रियार्थसन्निकर्षं विभजते प्रत्यक्षेति संयोगसन्निकर्ष
मुदाहरति चक्षुषेति द्रव्यप्रत्यक्षे सर्वत्र संयोगः सन्निकर्ष इत्यर्थः आत्मा मनसा संयुज्यते मन इंद्रिये
ण इंद्रियमर्थेन ततः प्रत्यक्षज्ञानमुत्पद्यते संयुक्तसमवायमुदाहरति घटरूपेति तत्र युक्तिमाह
चक्षुःसंयुक्त इति संयुक्तसमवेतसमवायमुदाहरति रूपत्वेति समवायमुदाहरति श्रोत्रेणेति त
दुपपादयति कर्णेति ननु दूरस्थशब्दस्य कथं श्रोत्रसंबंध इति चेन्न वीचीतरंगन्यायेन कदंबमुकु

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

लन्यायेन वा शब्दाच्छब्दांतरोत्पत्तिक्रमेणान्यदेशेजातस्य श्रोत्रदेशसंबंधात् प्रत्यक्षत्वसंभवः
समवेतसमवायमुदाहरति शब्दत्वेति विशेषणविशेष्यभावमुदाहरति अभावेति तदुपपादय
ति घटाभाववदिति भूतले घटोनास्तीत्यत्र अभावस्य विशेष्यत्वं द्रष्टव्यं एतेन अनुपलब्धेः प्रमा
णांतरं निरस्तं यद्यत्र घटोऽभविष्यत्तदा भूतलमिवाद्रक्ष्यत् दर्शनाभावान्नास्तीति तर्कितप्रतियोगि
सत्वविरोध्यनुपलब्धिसहकृतेंद्रियेणैव अभावज्ञानोपपत्तौ अनुपलब्धेः प्रमाणांतरत्वासंभवात्
अधिकरणज्ञानार्थमपेक्षणीयेंद्रियस्यैव कारणोपपत्तौ अनुपलब्धेः करणत्वस्यायुक्तत्वात् विशे
षणविशेष्यभावो विशेषणविशेष्यस्वरूपमेव नातिरिक्तः संबंधः प्रत्यक्षज्ञानमुपसंहरन् तस्य
करणमाह एवमिति असाधारणकारणत्वादिंद्रियं प्रत्यक्षज्ञानकरणमित्यर्थः प्रत्यक्षमुपसंह
रति तस्मादिति अनुमानं लक्षयति अनुमितिकरणमिति अनुमितेर्लक्षणमाह परामर्शेति न

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नुसंशयोन्तरप्रत्यक्षेअतिव्याप्तिः स्थाणुपुरुषसंशयानंतरं पुरुषत्वव्याप्यकरादिमानयमिति
परामर्शेसति पुरुषएवेतिप्रत्यक्षजननात् नचतत्रानुमितिरेवेतिवाच्यम् पुरुषंसाक्षात्करोमी
त्यनुव्यवसायविरोधात् इतिचेन्न पक्षतासहकृतपरामर्शजन्यत्वस्यविवक्षितत्वात् सिसाध
यिषाविरहसहकृतसिद्ध्यभावः पक्षता साध्यसिद्धिरनुमितिप्रतिबंधिकासिद्धिसत्वेपि अनुमिनुया
मितिइच्छायांसत्यां अनुमिति दर्शनात् सिसाधयिषाउत्तेजिका ततश्चोत्तेजकाभावविशिष्टमण्य
भावस्यदाहकरणत्ववत् सिसाधयिषाविरहसहकृतसिद्ध्यभावस्यापि अनुमितिकारणत्वं परा
मर्शंलक्षयतिव्याप्तीति व्याप्तिविषयकंयत्पक्षधर्मताज्ञानंसपरामर्शइत्यर्थः परामर्शमभिनीय
दर्शयति यथेति अनुमितिमभिनयति तज्जन्यमिति परामर्शजन्यइत्यर्थः व्याप्तेर्लक्षणमाह य
त्रधूमइतिव्याप्तेरभिनयःसाहचर्यनियमइतिलक्षणम् साहचर्यंसामानाधिकरण्यम् तस्यनि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

यमः हेतुसमानाधिकरणात्यंताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरित्यर्थः प
क्षधर्मतास्वरूपमाह व्याप्यस्येति स्वार्थानुमितिं दर्शयति स्वयमेवेति भूयोदर्शनेनेति ननु पा
र्थिवत्वलोहलेख्यत्वादौ शतशः सहचारदर्शने हीरकेपि व्यभिचारोपलब्धेर्भूयोदर्शनेन कथं व्याप्ति
ग्रह इति चेन्न व्यभिचारज्ञानविरहसहकृतसहचारज्ञानस्य व्याप्तिग्राहकत्वात् व्यभिचारज्ञान
निश्चयः शंका च तद्विरहः क्वचित्तर्कात्क्वचित्स्वतः सिद्ध एव धूमाग्निव्याप्तिग्रहे कार्यकारणभाव
भंगप्रसंगलक्षणस्तर्को व्यभिचारशंकानिवर्तकः ननु सकलवन्हिधूमयोरसन्निकर्षात्कथं व्याप्तिग्र
ह इति चेन्न धूमत्ववन्हित्वरूपसामान्यप्रत्यासत्त्या सकलधूमवन्हिज्ञानसंभवात् तस्मादिति
लिंगपरामर्शादित्यर्थः परार्थानुमानमाह यत्त्विति यच्छब्दस्य तत्परार्थानुमानमिति तच्छ
ब्देनान्वयः पंचावयववाक्यमुदाहरति यथेति अवयवस्वरूपमाह प्रतिज्ञेति उदाहृतवा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

क्येप्रतिज्ञाविशेषमाह पर्वतोवन्हिमानिति साध्यवत्तया पक्षवचनम् प्रतिज्ञा पंचम्यंतं तृ-
तीयांतं वा लिंगप्रतिपादकवचनं हेतुः व्याप्तिप्रतिपादकमुदाहरणम् व्याप्तिविशिष्टलिंगप्रति
पादकवाक्यमुपनयः हेतुसाध्यवत्तया पक्षप्रतिपादकवचनं निगमनं पक्षज्ञानं प्रतिज्ञाप्रयो
जनम् लिंगज्ञानं हेतुप्रयोजनं व्याप्तिज्ञानमुदाहरणप्रयोजनं पक्षधर्मताज्ञानमुपनयः अबा
धितत्वादिकं निगमनप्रयोजनम् अनुमितिकरणमाह स्वार्थेति ननु व्याप्तिस्मृतिपक्षताज्ञा-
नाभ्यामेवानुमितिसंभवे विशिष्टपरामर्शः किमर्थमंगीकर्तव्य इति चेन्न वन्हिव्याप्यधूमवानय-
मिति शब्दपरामर्शस्थले परामर्शस्यावश्यकतया लाघवेन सर्वत्र परामर्शस्यैव कारणत्वात् लिंगं न
करणं अतीतादौ व्यभिचारात् व्यापारवत्कारणं करणमिति मते परामर्शद्वारा व्याप्तिज्ञानं करणं
तज्जन्यत्वे सति तज्जन्यजनको व्यापारः अनुमानमुपसंहरति तस्मादिति लिंगं विभजते लिंगमि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ति अन्वयव्यतिरेकिलक्षयति अन्वयेनेति हेतुसाध्ययोर्व्याप्तिरन्वयव्याप्तिः तदभावयोर्व्याप्ति-
र्व्यतिरेकव्याप्तिः केवलान्वयिनोलक्षणमाह अन्वयमात्रेति केवलान्वयिसाध्यकंकेवलान्वयि अ-
त्यंताभावाप्रतियोगित्वंकेवलान्वयित्वं ईश्वरप्रमाविषयत्वंसर्वपदाभिधेयत्वंचसर्वत्रअस्तीतिव्यति
रेकाभावः व्यतिरेकमुदाहरति पृथिवीतिननुइतरभेदः प्रसिद्धोनवाआद्येयत्रप्रसिद्धस्तत्रहेतुसत्वे
अन्वयित्वं असत्वेअसाधारण्यं द्वितीयेसाध्यज्ञानाभावात्कथंतद्विशिष्टानुमितिः विशेषणज्ञाना
भावेविशिष्टज्ञानानुदयात् प्रतियोगिज्ञानाभावात् व्यतिरेकव्याप्तिज्ञानमपिनस्यादितिचेन्नज
लादित्रयोदशान्योन्याभावानांत्रयोदशस्कप्रत्येकंप्रसिद्धानांमेलनंपृथिव्यांसाध्यते त्रयोदशत्वा
वच्छिन्नसाध्यस्यएकाधिकरणवृत्तित्वाभावात् नान्वयित्वासाधारण्येप्रत्येकाधिकरणप्रसिद्ध्या
साध्यविशिष्टानुमितिर्व्यतिरेकव्याप्तिनिरूपणंचेति पक्षलक्षणमाह संदिग्धेति ननुश्रवणानंतर

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भाविमननस्थले अव्याप्तिः तन्नवेदवाक्येरात्मनोनिश्चितत्वेनसंदेहाभावात् किंच प्रत्यक्षेपिवन्हौ
यत्रेच्छयानुमितिस्तत्राव्याप्तिरितिचेन्न उक्तपक्षताश्रयत्वस्यपक्षलक्षणत्वात् सपक्षलक्षणमा
ह निश्चितेति एवंसद्धेतुंनिरूप्य असद्धेतुंनिरूपयितुंविभजते सव्यभिचारेति अनुमितिप्रतिबंधक
यथार्थज्ञानविषयत्वं हेत्वाभासत्वं सव्यभिचारंविभजते सत्रिविधइति साधारणंलक्षयति तत्रेति
उदाहरतियथेति असाधारणंलक्षयति सर्वेति अनुपसंहारिणोलक्षणमाह अन्वयव्यतिरेकेति वि
रुद्धंलक्षयति साध्याभावेति सत्प्रतिपक्षंलक्षयति यस्येति असिद्धंविभजते आसिद्धइति आ
श्रयासिद्धमुदाहरति गगनेति स्वरूपासिद्धमुदाहरति शब्दइति व्याप्यत्वासिद्धस्यलक्ष-
णमाह सोपाधिकइति उपाधिलक्षणमाह साध्येतिउपाधिश्चतुर्विधः केवलसाध्यव्यापकः
पक्षधर्मावच्छिन्नसाध्यव्यापकः साधनावच्छिन्नसाध्यव्यापकः उदासीनधर्मावच्छिन्नसाध्यव्याप

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कथ्येति आद्यआर्द्रेंधनसंयोगः द्वितीयोयथावायुः प्रत्यक्षः प्रमेयत्वादित्यत्रबहिर्द्रव्यत्वावच्छि
न्नप्रत्यक्षत्वव्यापकंउद्भूतरूपवत्वम् तृतीयोयथासस्यामोमित्रातनयत्वादित्यत्रमित्रातनयत्वा
वच्छिन्नस्यामत्वस्यव्यापकंशाकपाकजत्वंप्रकारांतरेण तृतीयोयथा ध्वंसोविनाशीजन्यत्वादित्य
त्रजन्यत्वावच्छिन्नानित्यत्वव्यापकं भावत्वं चतुर्थस्तुप्रागभावोविनाशी प्रमेयत्वादित्यत्रजन्यत्वा व-
च्छिन्नानित्यत्वव्यापकंभावत्वंबाधितस्यलक्षणमाह यस्येति अत्रबाधस्यग्राह्याभावनिश्चयत्वेन स-
प्रतिपक्षस्यविरोधिज्ञानसामग्रीत्वेनसाक्षादनुमितिप्रतिबंधकत्वं इतरेषांतुपरामर्शप्रतिबंधकत्वं
तत्रापिसाधारणस्याव्यभिचाराभावतयाविरुद्धस्यसामानाधिकरण्याभावतयाव्याप्यत्वासिद्धस्यवि
शिष्टव्याप्यभावतयाअसाधारणानुपसंहारिणोर्व्याप्तिसंशयाधायकत्वेननचव्याप्तिज्ञानप्रतिबंधक
त्वम् आश्रयासिद्धस्वरूपासिद्धयोः पक्षधर्मताज्ञान प्रतिबंधकत्वं उपाधिस्तुव्यभिचारज्ञान द्वारा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

व्याप्तिज्ञानप्रतिबंधकः सिद्धसाधनं तु पक्षताविघटनया आश्रयासिद्धेःअंतर्भवति निग्रहस्थानां
तरमिति नवीनाः उपमानं लक्षयति उपमितीति शब्दं लक्षयति आप्तेति पदलक्षणमाह शक्तमि·
ति अर्थस्मृत्यनुकूलः पदपदार्थसंबंधः शक्तिः सा च पदार्थांतरमिति मीमांसकाः तन्निरासार्थमाह
अस्मादिति डित्थादीनामिव घटादीनामपि संकेत एव शक्तिः न तु पदार्थांतरमित्यर्थः गवादिशब्दा·
नां जातावेव शक्तिः विशेषणतया जातेः प्रथममुपस्थितत्वात् व्यक्तिलाभस्तु आक्षेपादिना इति केचित्त
न्न गामानयेत्यादौ वृद्धव्यवहारे सर्वत्रानयनादेर्व्यक्तावेव संभवेन जातिविशिष्टव्यक्तावेव शक्तिकल्प
नात् शक्तिग्रहश्च वृद्धव्यवहारेण व्युत्पित्सुर्बालो गामानयेत्युत्तमवृद्धवाक्यश्रवणानंतरं·
मध्यमवृद्धस्य प्रवृत्तिमुपलभ्य गवानयनं दृष्ट्वा मध्यमवृद्धप्रवृत्तिजनकज्ञानस्य अन्वयव्यति
रेकाभ्यां वाक्यजन्यत्वं निश्चित्य अश्वमनय गां बधानेति वाक्यांतरे आवापोद्वापाभ्यां गोपद

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

स्यगोत्वविशिष्टेशक्तिः अश्वपदस्य अश्वत्वविशिष्टइतिव्युत्पद्यते ननुसर्वत्रकार्यपरत्वाद्व्यवहार
स्यकार्यपरवाक्येएवव्युत्पत्तिः नासिद्धपराइतिचेन्न कांच्यांत्रिभुवनतिलको भूपतिरित्यादौसिद्धे
पिव्यवहारात् विकसितपद्मेमधुकरइत्यादौ प्रसिद्धपदसमभिव्याहारात् सिद्धेपिमधुकरादि
पदेव्युत्पत्तिदर्शनाच्च लक्षणापिशब्दवृत्तिः शक्यसंबंधोलक्षणा गंगायांघोषइत्यत्रगंगाप
दवाच्यप्रवाहासंबंधादेवतीरोपस्थितौ तीरेपिशक्तिर्नकल्प्यते सैंधवादौलवणाश्वयोः परस्प
रसंबंधाभावान्नानाशक्तिकल्पना लक्षणात्रिविधा जहल्लक्षणा अजहल्लक्षणा जहदजह
ल्लक्षणाचेति यत्रवाच्यार्थस्यान्वयाभावस्तत्रजहतीति यथामंचाः क्रोशंतीति यत्रवाच्यस्या
पिअन्वयस्तत्र अजहतीति यथा छत्रिणोगच्छंतीति यत्रवाच्यैकदेशत्यागेनएकदेशान्वय
स्तत्रजहदजहती यथातत्त्वमसीति गौण्यपिलक्षणैव लक्ष्यमाणगुणसंबंधरूपाअग्निर्मा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

णवकइति व्यंजनापिशक्तिलक्षणांतर्भूता अर्थशक्तिमूलाच अनुमानादिनाअन्यथासि
द्धा तात्पर्यमुपपत्तिर्लक्षणाबीजम् तत्प्रतीतीच्छयाउच्चरितत्वंतात्पर्यम् तात्पर्यज्ञानंचवा
क्यार्थज्ञानहेतुः नानार्थानुरोधात्प्रकरणादिकं तात्पर्यग्राहकं द्वारमित्यादौपिधेहीतिशब्दा
ध्याहारः ननुअर्थज्ञानार्थत्वात् शब्दस्यअर्थमविज्ञायशब्दाध्याहारासंभवात् अर्थाध्याहा
रोयुक्तइतिचेन्न पदविशेषजन्यपदार्थोपस्थितौशब्दज्ञानहेतुत्वात् अन्यथाघटः कर्मत्वंआन
यनंकृतिरित्यत्रापिशाब्दज्ञानप्रसंगात् योगोरूढिर्योगरूढिश्चेतिशक्तिस्त्रिविधा पाचकादिप
देषुयोगः घटादिपदेषुरूढिः पंकजादिपदेषुयोगरूढिः अवयवशक्तिर्योगः समुदायशक्तिः
रूढिः नियतपद्मज्ञानार्थंसमुदायशक्तिः अन्यथाकुमुदेपिप्रयोगप्रसंगः इतरान्वितेशक्ति
रितिप्राभाकराः अन्वयस्यवाक्यार्थतयाभानसंभवादन्वयांशेपिशक्तिर्नकल्पनीयेतिगौतः

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

मीयाः आकांक्षेति आकांक्षादिज्ञानमित्यर्थः अन्यथा आकांक्षादिभ्रमात् शाब्दधीभ्रमो नस्यात् आकांक्षांलक्षयति पदस्येति योग्यतालक्षणमाह अर्थेति सन्निधिलक्षणमाह पदानामिति अविलंबेनपदार्थोपस्थितिः सन्निधिः उच्चारणंतुतदुपयोगितयायुक्तं गौरश्वः पुरुषइति घटः कर्मत्वम् इत्यनाकांक्षोदाहरणंद्रष्टव्यम् वैदिकस्यविशेषमाह वैदिकं ईश्वरोक्तत्वादिति ननुवैदिकस्यअनादिकत्वात् कथमीश्वरोक्तत्वमितिचेन्न वेदःपौरुषेयः वाक्यसमूहत्वात् भारतादिवत् नचस्मर्यमाणकर्तृकत्वंउपाधिः गौतमादिभिः शिष्यपरंपरयावेदेपिकर्तृस्मरणेनसाधनेव्यापकत्वात् तस्मात्तेपानात्त्रयोवेदाअजायंतइतिश्रुतेश्चननुवर्णानित्याः सएवायंगकारइतिप्रत्यभिज्ञानबलात् तथाचकथंवेदस्यानित्यत्वमिति चेन्न उत्पन्नोगकारोविनष्टोगकारइतिप्रतीत्यावर्णानामनित्यत्वात् सोयंगकारइतिप्रत्यभि

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज्ञायाः सेयंदीपज्वालेति वज्जात्यालंबनत्वात् वर्णानांनित्यत्वेपि आनुपूर्वीविशिष्टवाक्य
स्यनित्यत्वाच्च तस्मादीश्वरोक्तोवेदः मन्वादिस्मृतीनामाचाराणांचवेदमूलकतयाप्रामा-
ण्यम् स्मृतिमूलवाक्यानामिदानीमनध्ययनात् तन्मूलभूताकाचिच्छाखाउत्सन्नेतिकल्प्यते
ननुपठ्यमानवेदवाक्योत्सादस्यकल्पयितुमशक्यतयाविप्रकीर्णवादस्यायुक्तत्वान्नित्यानुमेयो
वेदोमूलमितिचेन्न तथापिवर्णानुपूर्वीज्ञानाभावेनबोधकत्वासंभवात् नन्वेतानिपदानिस्मा
रितार्थसंसर्गवंति आकांक्षादिमत्पदकदंबकत्वात् सद्वाक्यवदित्यनुमानादेवसंसर्गज्ञानसंभ
वात् शब्दोनप्रमाणांतरमितिचेन्न अनुमित्यपेक्षयाशाब्दज्ञानस्यविलक्षणस्यशब्दात्प्रत्येमी
त्यनुव्यवसायसाक्षिकत्वसर्वसंमतत्वात् नन्वर्थापत्तिरपिप्रमाणांतरमस्तिपीनोदेवदत्तोदि
वानभुंक्ते इतिदृष्टेश्रुतेवापिनत्वान्यथानुपपत्त्यारात्रिभोजनम् अर्थापत्त्याकल्प्यते इतिचेन्नदे

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

वदत्तोरात्रौभुंक्ते दिवाअभुंजानत्वेसति पीनत्वात् इत्यनुमानेनैवरात्रिभोजनस्यासिद्धत्वात् श-
तपंचाशदितिसंभवोप्यनुमानमेव इहवटेयक्षस्तिष्ठतीत्यैतिह्यमपिअज्ञानमूलवक्तृकःशब्दए-
वचेष्टापिशब्दानुमान द्वारा व्यवहार हेतुरितिनमानांतरं तस्मात्प्रत्यक्षानुमानोपमानशब्दाश्चत्वा
र्यैवप्रमाणानिसर्वेषांज्ञानानांतद्वतितत्प्रकारकत्वंस्वतोग्राह्यंपरतोवेतिविचार्यते तत्रविप्रतिप-
त्तिः ज्ञानप्रामाण्यंतदप्रामाण्यग्राहकयावज्ज्ञानग्राहकसामग्रीग्राह्यंवाअत्रविधिकोटिःस्वतस्त्व
निषेधकोटिः परतस्त्वं अनुमानग्राह्यत्वेनासिद्धसाधनतावारणाययावदिति इदंज्ञानमप्रमेति
ज्ञानेन प्रामाण्यग्रहात् बाधवारणायअप्रामाण्यमग्राहकेति इदंज्ञानअप्रमेत्यनुव्यवसायनिष्ठ
प्रामाण्यग्राहकस्यअप्रामाण्याग्राहकत्वाभावात् स्वतस्त्वंनस्यादतस्तदिति तस्मिन्प्रामाण्याश्रये
अप्रामाण्याग्राहकेत्यर्थः उदाहृतस्थलेव्यवसायेअप्रामाण्यग्राहकेस्यापि अनुव्यवसायेतद्ग्राहक

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्वात् स्वतस्त्वासिद्धिः ननु स्वत एव प्रामाण्यं गृह्यते घटमहं जानामीत्यनुव्यवसायेन घटघटत्व
योरिव तत्संबंधस्यापि विषयीकरणात् व्यवसायरूपप्रत्यासत्तेस्तुल्यत्वात् पुरोवर्तिनि प्रकारसंबं
धस्यैव प्रमात्वपदार्थत्वादिति चेन्न स्वतः प्रामाण्यग्रहे जलज्ञानं प्रमा न वेत्यनभ्यासदशायां प्रमा
त्वसंशयो न स्यात् अनुव्यवसायेन प्रामाण्यस्य निश्चितत्वात् तस्मात्स्वतोग्राह्यत्वाभावात्परतोग्राह्य
त्वं तथाहि प्रथमं जलज्ञानानंतरं प्रवृत्तौ सत्यां जललाभे सति पूर्वोत्पन्नं जलज्ञानं प्रमा समर्थप्रवृ
त्तिजनकत्वात् यन्नैवं तन्नैवं यथा अप्रमेति व्यतिरेकिणा प्रमात्वं निश्चीयते द्वितीयादिज्ञानेषु पूर्व
ज्ञानदृष्टांतेन तत्सजातीयत्वलिंगेन अन्वयव्यतिरेकिणापि गृह्यते प्रमायां गुणजन्यत्वं उत्पत्तौ पर
तस्त्वं प्रमासाधारणकारणं गुणः अप्रमासाधारणकारणं दोषः तत्र प्रत्यक्षे विशेषणवद्विशेष्यस
न्निकर्षो गुणः अनुमितौ व्यापकवद्व्याप्यज्ञानम् उपमितौ यथार्थसादृश्यज्ञानं शब्दज्ञाने यथा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

र्थयोग्यताज्ञानमित्यादूह्नीयम् पुरोवर्तिनिप्रकाराभावस्य व्यवसायेनअनुपस्थितत्वाद
प्रमात्वंपरतएवगृह्यते पित्तादिदोषजन्यत्वादुत्पत्तौपरतस्त्वम् ननुसर्वज्ञानानांयथार्थत्वात्
अयथार्थज्ञानमेवनास्ति नचशुक्तौइदंरजतमितिज्ञानात्प्रवृत्तिदर्शनादन्यथाख्यातिसिद्धि
रितिवाच्यम् रजतमितिपुरोवर्तिज्ञानाभ्यामेवप्रवृत्तिसंभवादुपस्थितेष्टभेदाग्रहस्यैवसर्व
त्रप्रवर्तकत्वेन इदंरजतमित्यादावतिप्रसंगाभावादितिचेन्न सत्यरजतस्थलेपुरोवर्तिविशेष्यकर
जतत्वप्रकारकज्ञानस्यलाघवेनप्रवृत्तिजनकतयाशुक्तावपिरजतार्थिप्रवृत्तिजनकत्वेनविशिष्टज्ञान
स्यैवकल्पनात् अयथार्थानुभवंविभजते अयथार्थेति स्वप्नस्यमानसविपर्ययरूपत्वान्नत्रैविध्य
विरोधः संशयलक्षणमाह एकस्मिन्निति घटपटाविति समूहालंबनातिव्याप्तिवारणायैकस्मि
न्निति घटोद्रव्यमित्यादावतिव्याप्तिवारणायविरुद्धेति पटत्वविरुद्धघटत्वत्वानित्यत्वातिव्या

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त्तिवारणाय नानेति विपर्ययलक्षणमाह मिथ्येति तदभाववति तत्प्रकारकनिश्चय इत्यर्थः त
र्कं लक्षयति व्याप्येति यद्यपि तर्को विपर्यये अंतर्भवति तथापि प्रमाणानुग्राहकत्वात् भेदेन की
र्तनं स्मृतिं विभजते स्मृतिरिति स्फुरत्वं लक्षयति सर्वेषामिति स्फुरत्यहमित्याद्यनुव्यवसायगम्यं
स्फुरत्वादिकमेव लक्षणम् यथाश्रुतं तु स्वरूपकथनमिति द्रष्टव्यम् संस्कारं विभजते संस्कार इति सं
स्कारत्वजातिमान् संस्कारः वेगस्याश्रयमाह वेग इति वेगत्वजातिमान्वेगः भावनां लक्षयति अनुभ
वेति अनुभवध्वंसेऽतिव्याप्तिवारणाय स्मृतीति स्मृतेरपि संस्कारजनकत्वं नवीनैरुक्तं स्थितिस्थापकं
लक्षयति अन्यथेति संख्यादयो नैमित्तिकद्रवत्ववेगस्थितिस्थापकाः सामान्यगुणाः अन्यरूपा
दयो विशेषगुणाः द्रव्यविभाजकोपाधिद्वयसमानाधिकरणावृत्तिजातिमत्त्वं विशेषगुणत्वम्
कर्मणो लक्षणमाह चलनेति उत्क्षेपणादीनां कार्यभेदमाह ऊर्ध्वेति शरीरेति वक्रतासंपाद

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

कर्माकुंचनम् अयुतासंपादकं प्रसारणमित्यर्थः सामान्यंलक्षयति नित्यमिति परमाणुपरि
माणादावतिव्याप्तिवारणाय अनेकेति अनुगतत्वं समवेतत्वं तेनेनअभावादावतिव्याप्तिः वि
शेषंलक्षयति नित्येति समवायंलक्षयति नित्यइति संयोगे ऽतिव्याप्तिवारणायनित्येति
आकाशादावतिव्याप्तिवारणायसंबंधइति ननुसमवायसत्वे किंप्रमाणमितिचेन्न अयुतसि
द्धलक्षणमाह ययोरिति नीलोघटइतिविशिष्टप्रतीतिः विशेषणविशेष्यसंबंधविषयावि
शिष्टप्रत्ययत्वात् दंडीतिप्रत्ययवत् इतिसमवायसिद्धिः अवयवावयविनाविति द्रव्यसम
वायिकारणमवयवः जन्यद्रव्यमवयवि प्रागभावंलक्षयति अनादिरिति आकाशादावतिव्याप्ति
वारणायसांतइति घटादावतिव्याप्तिवारणायानादिरिति प्रतियोगिसमवायिकारणवृत्तिः
प्रतियोगिजनकः भविष्यतीतिव्यवहारहेतुः प्रागभावः प्रध्वंसंलक्षयतिसादिरिति घ

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

त॰ सं॰ रादावतिव्याप्तिवारणायअनंतइति आकाशादावतिव्याप्तिवारणायसादिरिति प्रतियोगि- दी॰
२० जन्यः प्रतियोगिसमवायिकारणवृत्तिर्ध्वस्तव्यवहारहेतुर्ध्वंसः अत्यंताभावं लक्षयति त्रैका-
लिकइति अन्योन्याभावेऽतिव्याप्तिवारणायसंसर्गावच्छिन्नेति ध्वंसप्रागभावयोरतिव्याप्ति
वारणायत्रैकालिकइति अन्योन्याभावंलक्षयति तादात्म्येतिघटः पटोनभवतीति प्रतियो
गितावच्छेदकतयासंपासंसर्गभेदादेकप्रतियोगिकयोरत्यंताभावान्योन्याभावयोर्बहुत्व-
मू केवलदेवदत्ताभावोदंड्यभावः केवलदेवदत्तासद्भावेपि दंडाभावे दंड्यभावइति प्रती
त्याविशिष्टाभावः एकसत्वेद्वौनस्तइति प्रतीत्याद्वित्वावच्छिन्नाभावः संयोगसंबंधेन घटवतिस
मवायसंबंधेनघटाभावः तत्तद्घटाभावाद्घटत्वावच्छिन्नप्रतियोगिकसामान्याभावः अतिरिक्तः २०
एवमन्योन्याभावोपि घटत्वावच्छिन्नः पटोनास्तीति व्यधिकरणधर्मावच्छिन्नप्रतियोगिताका

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

भावोनांगीक्रियते परेघटत्वन्नास्तीतितदर्थः अतिरिक्तत्वेसकेवलान्वयीसामायिकाभावो त्यंता
भावएवसमयविशेषेप्रतीयमानः घटाभाववतिघटानयनेअत्यंताभावस्यान्यत्रगमनाभावेऽप्र
प्रतीतः घटापसरणेसतिप्रतीतेः भूतलघटसंयोगप्रागभावप्रध्वंसयोरत्यंताभावप्रतीतिनि-
यमकत्वंकल्प्यते घटवतितत्संयोगप्रागभावध्वंसयोरसत्वात् अत्यंताभावस्याप्रतीतिः घटा
पसरणेचसंयोगध्वंससत्वात् प्रतीतिरिति केवलाधिकरणादेवनास्तीतिव्यवहारोपपत्तौअभा
वोनपदार्थांतरमितिगुरवः तन्नअभावानंगीकारेकेवलस्यनिर्वक्तुमशक्यत्वात् अभावाभावो-
भावएवनातिरिक्तः अनवस्थाप्रसंगात् ध्वंसप्रागभावः प्रागभावध्वंसश्चप्रतियोग्येव अभावाभा
वोतिरिक्तएव तृतीयाभावस्यप्रथमत्वान्नानवस्थेतिनवीनाः ननुप्रमाणप्रमेयसंशयप्रयोजनदृ
ष्टांतसिद्धांतावयवतर्कनिर्णयवादजल्पवितंडहेत्वाभासच्छलजातिनिग्रहस्थानानांतत्वज्ञा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नान्निःश्रेयसाधिगमइतिन्यायशास्त्रेषोडशपदार्थानामुक्तत्वात्कथंसप्तैवेत्यत आह सर्वेषामिति
सर्वेषांसप्तस्वेवांतर्भावइत्यर्थः आत्मशरीरेंद्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुः
खापवर्गास्तु प्रमेयमिति द्वादशविधंप्रमेयम् प्रवृत्तिधर्माधर्मौरोगद्वेषमोह दोषाः रागः इ-
च्छा दोषोमन्युःमोहः शरीरादावात्मभ्रमः प्रेत्यभावोमरणं फलंभोगः अपवर्गोमोक्षः सत्वस्व
समानाधिकरणदुःखप्रागभावासमानकालीनोदुःखध्वंसः प्रयोजनंसुखंदुःखं हानिश्च दृष्टां-
तो महानसादिः प्रामाणिकत्वेनाभ्युपगतोर्थः सिद्धांतः निर्णयोनिश्चयः प्रमाणफलं तत्वबु
भुत्सोः कथावादः उभयसाधनवती विजिगिषुकथाजल्पः स्वपक्षस्थापनहीनावितंडा कथाना
मनानावक्तृकः पूर्वोत्तरपक्षवाक्यसंदर्भः अभिप्रायांतरेण प्रयुक्तस्यअर्थांतरं प्रकल्प्यदूष-
णंछलम् असदुत्तरंजातिः साधर्म्यवैधर्म्योत्कर्षापकर्षवर्ण्यावर्ण्यविकल्प्यसाध्यप्राप्त्यप्राप्ति २१

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

प्रसंगप्रतिदृष्टांतानुत्पत्तिसंशयप्रकरणहेत्वर्थापत्त्यविशेषोपलब्ध्यनुपलब्धिकारणनित्या
नित्यकार्यसमाजातयः वादिनोपजयहेतुर्निग्रहस्थानं प्रतिज्ञाहानिः प्रतिज्ञांतरं प्रतिज्ञाविरोधः
प्रतिज्ञासंन्यासोहेत्वंतरमर्थांतरं निरर्थकमविज्ञातार्थोऽपार्थकमप्राप्तकालं न्यूनमधिकं पुन
रुक्तमननुभाषणमज्ञानमप्रतिभाविक्षेपोऽमतानुज्ञापर्यनियोज्यापेक्षणं निरनुयोज्यानुयोगोऽपसि
द्धांतोहेत्वाभासश्चनिग्रहस्थानानिशेषंस्फुटमम् ननुकरतलानलसंयोगेसत्यपिप्रतिबंधकेसं
तिदाहानुत्पत्तेःशक्तिःपदार्थांतरमितिचेन्न प्रतिबंधकाभावस्यकार्यमात्रेकारणत्वेनशक्तेरनुपयो
गात् कारणस्यैवशक्तिपदार्थत्वमिति ननुभस्मादिनाकांस्यादौशुद्धिदर्शनात् आधेयशक्तिरंगी
कार्येतिचेन्न भस्मादिसंयोगसमानकालीनस्पृश्यस्पर्शप्रतियोगिकयातदभावसहितभस्मादि
संयोगध्वंसस्यशुद्धिपदार्थत्वात् स्वत्वमपिनपदार्थांतरंयथेष्टविनियोगयोग्यत्वस्यस्वत्वस्व

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

रूपत्वात् तदवच्छेदकंचप्रतिग्रहादिलब्धत्वमेवेति अथविधिर्निरूप्यते प्रत्यवायजनक चिकी
र्षाजनकज्ञानविषयोविधिः तत्प्रतिपादकोलिंगादिर्वाकृत्यसाध्येप्रवृत्तिदर्शनात् कृतिसाध्यताज्ञा
नप्रवर्तकंनचविषभक्षणादौप्रवृत्तिप्रसंगः इष्टसाधनताप्रेरककृतिसाध्यताज्ञानस्यकाम्यस्थलेवि
हितकालजीवित्वस्यनिमित्तज्ञानजन्यत्वस्यानुगतत्वादितिगुरवः तन्नलाघवेन कृतिसाध्येष्टसाध
नताज्ञानस्यैवचिकीर्षाद्वाराप्रयत्नजनकत्वात् नचनित्येष्टसाधनत्वाज्ञानाभावाद्प्रवृत्तिप्रसंगः तत्रा
पिप्रत्यवायपरिहारस्यपापक्षयस्यचफलत्वकल्पनात् तस्मात्कृतिसाध्येष्टसाधनत्वमेवलिंगा
द्यर्थः ननुज्योतिष्टोमेनस्वर्गकामोयजेतेत्यत्रलिंङास्वर्गसाधनं कार्यंप्रतीयते यागस्य आशु-
विनाशिनः कालान्तरभाविस्वर्गसाधनत्वायोगात् योग्यंस्थायिकार्यं अपूर्वमेवलिंङर्थः कार्यं
कृतिसाध्यंकृतेःसविषयत्वात् विषयाकांक्षायांयोगोविषयत्वेनान्वितस्य कार्यमितिनियो-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

ज्याकांक्षायांस्वर्गकामपदं नियोज्यपरतयान्वितकार्यबोद्धा नियोज्यः तेनज्योतिष्टोमनामक यागविषयकं स्वर्गकामस्यकार्यमिति वाक्यार्थः संपद्यते वैदिकालिङित्वात् यावज्जीवमग्नि होत्रंजुहुयादिति नित्यवाक्येप्यपूर्वमेवकल्प्यते आरोग्यकामो भेषजपानंकुर्यादित्यादौ लौकि कलिङः क्रियारूपकार्यलक्षणेतिचेन्न यागस्याप्ययोग्यतानिश्चयाभावेन साधनतया प्रतीत्य नंतरं तन्निर्वाहार्थमवांतरव्यापारतया पूर्वकल्पनात्कीर्तनादिनानश्यतेस्तेनयागध्वंसोव्यापारः लौ किकव्युत्पत्तिबलात् वेदादावपि कृतिसाध्यत्वं लिङाबोध्यतइति लिङ्रूपत्वेनरूपेणविध्यर्थ- त्वंआख्यार्थत्वेन प्रयत्नार्थकत्वं पचतिपाकंकरोतीतिविवरणदर्शनात् किंकरोतीतिप्रश्नेपचती त्युत्तराच्चाख्यातस्याप्रयत्नार्थत्वनिश्चयात् रथोगच्छतीत्यादावनुकूलव्यापारेलक्षणा देवद- त्तः पचति तंदुलादेवदत्तेनपच्यंते तंदुलइत्यादौ कर्तृकर्मणोर्नाख्यातार्थत्वंकिंतु तद्गतैकत्वा

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

दीनामेवतयोराक्षेपादेवलाभः प्रयजतीत्यादौ धातोरेवप्रकर्षे शक्तिः उपसर्गाणांद्योतकत्व
मेवनतत्रशक्तिरस्ति पदार्थज्ञानस्यपरमंप्रयोजनंमोक्षः तथाहि आत्मावारेद्रष्टव्यः श्रोतव्यो
मंतव्यो निदिध्यासितव्यइतिश्रवणादीनांसाक्षात्कारहेतुत्वबोधनात् श्रुत्यादेहादिविलक्ष-
णात्मज्ञानेसत्यपि असंभावनानिवृत्तेर्युक्त्यनुसंधानुरूपमनःसाध्यत्वात् मननोपयोगिपदार्थ
निरूपणद्वाराशास्त्रस्यापिमोक्षयोगः तदनंतरंश्रुत्योपदिष्टयोगविधिनानिदिध्यासनेकृतेतद
नंतरंदेहादिविलक्षणसाक्षात्कारेसति देहादावभिमानरूपमिथ्याज्ञाननाशेसतिदोषाभावा
त् प्रवृत्त्यभावेधर्माधर्मयोरभावात् जन्माभावेपूर्वधर्माधर्मयोरनुभावेननाशेचरमदुःखध्वं-
सलक्षणोमोक्षोजायते ज्ञानमेवमोक्षसाधनम् मिथ्याज्ञाननिवृत्तेर्ज्ञानमात्रसाध्यत्वात् तमेव-
विदित्वातिमृत्युमेतिनान्यः पंथाविद्यतेयनायेतिसाधनांतरनिषेधाच्च ननुतत्प्राप्तिहेतुर्विज्ञा-

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

नंकर्मचोक्तंमहामुने इतिकर्मणोपिमोक्षसाधनत्वस्मरणात् ज्ञानकर्मणोः समुच्चयइतिचे-
न्न नित्यनैमित्तिकैरेवकर्मभिर्दुरितक्षयं ज्ञानंचविमलीकुर्वन्नभ्यासेनचपावयेत् अभ्यासाचक्क
चिज्ज्ञानंकैवल्यंलभतेनरः इत्यादिनाकर्मणोज्ञानसाधनत्वप्रतिपादनात् ज्ञानद्वारैवकर्ममोक्ष
साधनम् नसाक्षात् तस्मात्पदार्थज्ञानात्मोक्षः परमंप्रयोजनमितिसर्वंरमणीयम् ॥ ॥
॥ इत्यनंतभट्टोपाध्यायकृततर्कसंग्रहदीपिकासमाप्ता ॥ ॥श्रीरस्तु॥ ॥ शुभंभवतु ॥

हें पुस्तक मुकाम मुंबई येथें काशिनाथ बाळकृष्ण खांडेकर यांणी नारायण रामचंद्र सोहनी यांच्या "जगदीश्वर" छापखान्यांत छापिलें॥ ॥ शके १८०१ विक्रम नामसंवत्सरे ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri

इतितर्कसंग्रहदीपिकासमाप्ता ॥

CC-0. Jangamwadi Math Collection. Digitized by eGangotri